MID-TERM EXAMINATION

Question Paper 2024-25

NCERT BASED SYLLABUS

FOR CBSE AND STATE BOARD
FOLLOWING NCERT

Mid Term Exam Question Paper 2024-25

Name : .....

Roll No. : .....

दिनाङ्कः - 23.09.2024 | अर्धवार्षिकी परीक्षा, 2024 | समयः – होरात्रयम्

कक्षा – दशमी | विषयः - संस्कृतम् | पूर्णाङ्काः - 80

(1) अस्मिन् प्रश्नपत्रे चत्वारः भागाः सन्ति।
'क' भागः – अपठितावबोधनम् –10 अङ्काः 'ख' भागः – रचनात्मककार्यम् –15 अङ्काः
'ग' भागः – अनुप्रयुक्तव्याकरणम् – 25 अङ्काः 'घ' भागः – पठितावबोधनम् – 30 अङ्काः

(2) कृपया सम्यक् परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति।

(3) उत्तरलेखनात् पूर्वं प्रश्नक्रमाङ्कः अवश्यं लेखनीयः।

(4) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।

(5) प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

'क' भागः अपठितावबोधनम् 10 अङ्काः

1. **अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत –**

स्वामिविवेकानन्दस्य जन्म विद्वज्जनानुसारं मकरसङ्क्रान्तौ कोलकातायाम् अभवत्। तेषां शैशवस्य नाम नरेन्द्रनाथदत्तः आसीत्। नरेन्द्रनाथस्य पिता विश्वनाथदत्तः माता च भुवनेश्वरीदेवी धार्मिकस्वभाविनी आसीत्। तस्याः अधिकः कालः शिवस्य पूजने व्यतीतः भवति स्म। स्वामिविवेकानन्दस्य गुरुः रामकृष्णपरमहंसः आसीत्। संन्यासदीक्षानन्तरं नरेन्द्रस्य नाम विवेकानन्दः इति अभवत्। सः भारतभ्रमणं योगसाधनां च कृत्वा 1893 तमे वर्षे अमेरिकादेशे विश्वधर्मसभायां भारतस्य गौरवं प्रतिष्ठापितवान्। सभास्थले विविधाः धर्मग्रन्थाः एकस्य उपरि एकः क्रमेण स्थापिताः आसन्। संयोगवशात् "गीता" सर्वेषां अधः आसीत्। एकः अमेरिकावासी उपहासपूर्वकम् अवदत् – स्वामिन्! भवतां गीता धर्मग्रन्थानाम् अधः वर्तते इति। प्रत्युत्पन्नमतिः विवेकानन्दः हसन् एव अवदत् – 'आम्! सत्यम्। आधारशिला तु अधः एव भवति। सा यदि बहिः स्वीक्रियेत तर्हि समग्रम् अधः पतिष्यति।' स्वामिविवेकानन्दस्य जन्मदिवसं भारतीयाः राष्ट्रिययुवादिवसस्य रुपे मानयन्ति।

(I) एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्) (1x2=2)

(i) विद्वज्जनानुसारं विवेकानन्दस्य जन्म कदा अभवत् ?

(ii) विवेकानन्दस्य गुरुः कः आसीत् ?

(iii) माता भुवनेश्वरीदेवी कीदृशी आसीत् ?

(II) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्) (2x2=4)

(i) अमेरिकावासी उपहासपूर्वकं किम् अवदत् ?

(ii) प्रत्युत्पन्नमतिः विवेकानन्दः हसन् किं प्रत्यवदत् ?

(iii) नरेन्द्रस्य पितुः किं नाम आसीत ?

(III) अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत – (1x1=1)

(IV) भाषिककार्यम् – (केवलं प्रश्नत्रयम्) (1x3=3)

(i) "विविधाः धर्मगन्थाः" अत्र विशेष्यपदं किम् ?

(ii) 'उपरि' इति पदस्य किं विलोमपदम् अनुच्छेदे आगतम् ?
(क) अधः (ख) कालः (ग) बहिः (घ) एव

(iii) 'भवति' क्रियापदस्य कर्तृपदं किम् अस्ति ?
(क) आधारशिला (ख) एव (ग) अधः (घ) गुरुः

(iv) 'जननी' इति पदस्य किं पर्यायपदम् अनुच्छेदे आगतम् ?
(क) पिता (ख) माता (ग) नेता (घ) भगिनी

'ख' भागः रचनात्मककार्यम् 15 अङ्काः

2. **भवत्याः नाम दिव्या। भवत्याः विद्यालयस्य छात्राः स्वतन्त्रतादिवससमारोहे भागं गृहीतवन्तः। तं विषयं वर्णयन्ती भगिनीम् अपूर्वां प्रति लिखिते पत्रे मञ्जूषातः पदानि चित्वा सम्पूर्णं पत्रं पुनः लिखतु – (½ x10=5)**

आदरणीये भगिनि! भिलाईतः

सादरं (i) _____ तिथिः _____

अत्र (ii) _____ तत्रास्तु। इदं (iii) _____ भवती अतीव प्रसन्ना भविष्यति। यत् स्वतन्त्रतादिवससमारोहे अस्माकं (iv) _____ सप्तम्याः कक्षायाः छात्राः भागं गृहीतवन्तः। तैः यः सांस्कृतिककार्यक्रमः प्रस्तुतः सः अतीव मनमोहकः (v) _____। कार्यक्रमस्य (vi) _____ प्रदेशस्य गृहराज्यमन्त्री आसीत्। तेन एव पथसञ्चलनस्य (vii) _____ कृतम्। (viii) _____ दृष्ट्वा दर्शकाः करतलध्वनिना तेषां (ix)_____ अकुर्वन्। अन्ते सर्वे छात्राः मोदकानि प्राप्य प्रसन्नाः भूत्वा स्व-स्वगृहं गतवन्तः।

भवदीया अनुजा

(x)_____

मञ्जूषापदानि–

मुख्यातिथिः ,	कार्यक्रमं ,	कुशलं ,	उत्साहवर्धनम् ,	दिव्या ,
विद्यालयस्य ,	प्रणामाः ,	ज्ञात्वा ,	निरीक्षणं ,	आसीत्

Contd...2

schools.aglasem.com

aglasem.com

3. प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्चवाक्यानि संस्कृतेन लिखत – (1x5=5)

उद्यानम् , बालकाः , बालिके , वृक्षः , खगाः , पुष्पाणि , सूर्यः , प्रसन्नाः , विकसन्ति , क्रीडन्ति , भ्रमतः , जनौ , कन्दुकम् , भ्रमणम् , पर्वताः , वातावरणम् , सन्ति



अथवा

'वृक्षाणां महत्त्वम्' इति विषयम् अधिकृत्य मञ्जूषापदानां सहायतया पञ्चवाक्येषु एकं अनुच्छेदं संस्कृतेन लिखत –

प्रकृतेः , शोभा , पर्यावरणस्य रक्षकाः , यच्छन्ति , प्राणवायुम् , औषधम् , काष्ठम् , फलानि , पुष्पाणि , मेघवर्षणे, सहायकाः , खगानाम् , आश्रयस्थलम्

4. अधोलिखितां कथां मञ्जूषायाः सहायतया पूरयित्वा पुनः लिखत – (½ x10=5)

एकस्मिन् (i)_____ एकः काकः अवसत्। एकदा सः (ii) _____ व्याकुलः अभवत्। सः जलम् अन्वेष्टुम् (iii)_____ अभ्रमत्। एकस्मिन् स्थाने सः एकं (iv)_____ अपश्यत्। तस्मिन् घटे (v)_____ जलम् आसीत्। अतः सः जलं पातुं सफलः न अभवत्। तदा सः एकम् (vi)_____ अचिन्तयत्। सः कुतश्चित् (vii)_____ आनयत् तान् च पाषाणखण्डान् एकैकं तस्मिन् घटे (viii)_____। एवं घटे जलं शनैः शनैः उपरि आगच्छत्। तदनन्तरं सः काकः जलं पीत्वा (ix)_____अभवत्। उद्यमेन कौशलेन च सः काकः जलं पीत्वा सफलः अभवत्। अतएव उक्तम् – उद्यमेन हि सिध्यन्ति कार्याणि न (x)_____।

घटं , इतस्ततः , वने , अल्पम् , पिपासया , उपायं , पाषाणखण्डान् , अक्षिपत् , मनोरथैः , प्रसन्नः

अथवा

रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत – (1x5=5)

सुधाकर : – नमस्ते आगच्छतु भवान् । (i) .....

अतिथिः – उपविशामि तावत्। भवतः पितृमहोदयाः गृहे न सन्ति किम् ?

सुधाकरः – सः तु इदानीम् एव (ii) .....

अतिथिः – किमर्थं सः चिकित्सालयं गतः ?

सुधाकरः – नास्ति विशेषं कारणम्। सः प्रतिदिनं (iii)..... तत्र गच्छति।

अतिथिः – एवम् अस्ति किम्, प्रतिदिनम् एव ?

सुधाकरः – आम् यदा कदा दुग्धं औषधं च अपि नयति।

अतिथिः – सः तु परोपकारं करोति।

सुधाकरः – किम् अत्र परोपकारः। (iv) .....

अतिथिः – धन्योऽहं यत् एतेषाम् अद्य (v)_____ ।

मञ्जूषा –

(i)	एतत् तु अस्माकं कर्तव्यम् एव
(ii)	उपविशतु
(iii)	दर्शनं भविष्यति
(iv)	चिकित्सालयं गतः
(v)	रुग्णेभ्यः फलं दातुं

'ग' भागः अनुप्रयुक्तव्याकरणम् 25 अङ्काः

5. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिविच्छेदं वा कुरुत – (केवलं प्रश्नचतुष्टयम्) – (1x4=4)

(i) राज्ञः स्वेषु गात्रेष्वपि निरासक्तिं विज्ञाय ब्रह्माण्डं व्याकुलं सञ्जातम्।

(ii) अदीयमानं धनं निधन + एकनिष्ठम् भवति।

(iii) षट् + एते पाठका गुणाः सन्ति।

(iv) मयूरः पक्षौ + अवधूय वदति

(v) कामात् क्रोधोऽभिजायते।

Contd...3

schools.aglasem.com
aglasem.com

6. अधोलिखितवाक्येषु रेखाङ्कित.तपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत – (केवलं प्रश्नचतुष्टयम्) – (1x4=4)

(i) अहो! <u>न ज्ञानं</u> भवत्याः ?
(क) नज्ञानं (ख) सज्ञानं (ग) अज्ञानं (घ) अभिज्ञानं

(ii) <u>देवाधिपतिः</u> शक्रः राजानं चक्षुः अयाचत्।
(क) देवानाम् अधिपतिः (ख) दैवानां पतिः (ग) देवेषु पतिः (घ) देवानाम् अधिपतीनाम्

(iii) मेषः <u>अश्वशालां</u> प्राविशत्।
(क) अश्वात् शालाम् (ख) अश्वेभ्यः शालाम् (ग) अश्वे शालाम् (घ) अश्वेन शालान्

(iv) <u>युधिष्ठिरार्जुनौ</u> रथारोहणं नाटयतः।
(क) युधिष्ठिरः च अर्जुनः च (ख) युधिष्ठिरः अर्जुनौ च
(ग) युधिष्ठिरौ च अर्जुनः (घ) युधिष्ठिरौ च अर्जुनौ च

(v) सर्वेषां महत्त्वं विद्यते <u>यथासमयम्</u>।
(क) समयम् यथा (ख) समयस्य अतिक्रमण (ग) समयम् अनतिक्रम्य (घ) अति समयः

7. अधोलिखितवाक्येषु रेखाङ्कित.तपदानां प्रकृति–प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत – (केवलं प्रश्नचतुष्टयम्) – (1x4=4)

(i) शारदा अम्भोज–<u>वदना</u> वर्तते।
(क) वदना + टाप् (ख) वद् + ना (ग) वदन + टाप् (घ) वादन + टाप्

(ii) राजहंसः <u>राजहंसी</u> च विहरतः।
(क) राज + हंसी (ख) राजहंस + ङीष् (ग) राजहंस + ङीप् (घ) राजहंस + ङीन्

(iii) <u>भारति</u>! तव कोशः अपूर्वः।
(क) भारत + ङीप् (ख) भारत + ई (ग) भारत + टाप् (घ) भारत + इ

(iv) त्वं <u>दिन + ठक्</u> कार्यं कुरु।
(क) दैनिकाम् (ख) दैनिकम् (ग) दैनिकः (घ) दैनिकी

(v) एषा सृष्टिः <u>रमणीय + टाप्</u>।
(क) रमणीया (ख) रामणीया (ग) रमणीयः (घ) रमणी

8. वाच्यानुसारं उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत – (केवलं प्रश्नत्रयम्) (1x3=3)

सुरेशः – मित्र! त्वम् कुत्र ..... ?
उमेशः – मित्र! ..... तु पुस्तकालयः गम्यते।
सुरेशः – तिष्ठ तावत्! ..... अपि चलामि।
उमेशः – आगच्छ। आवाभ्यां तत्र .....पठ्यते।

मञ्जूषा

मया	गच्छसि	पुस्तकं	अहम्

9. कालबोधकशब्दैः अधोलिखित–दिनचर्यां पूरयत – (केवलं प्रश्नत्रयम्) (1x3=3)

(i) शौर्यः प्रातः 5:00 ..... वादने उत्तिष्ठति।
(ii) ततः सः 5:15 ..... वादने योगाभ्यासं करोति।
(iii) तदनन्तरं सः 6:45 ..... वादने विद्यालयं गच्छति।
(iv) 1:30 ..... वादने आगत्य भोजनं करोति।

10. मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत–(केवलं प्रश्नचतुष्टयम्) (1x4=4)

(i) ..... बोधिसत्वः राजा अभवत्।
(ii) अश्वाः प्राणत्राणाय ..... अधावन्।
(iii) रामः ..... असत्यं न वदति।
(iv) ग्रामात् ..... नदी वहति।
(v) कच्छपः सदा ..... चलति।

मञ्जूषा –

शनैः	बहिः	पुरा	कदापि	इतस्ततः

11. अधोलिखितवाक्येषु रेखाङ्कित–अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत – (केवलं प्रश्नत्रयम्) (1x3=3)

(i) पिता पुत्राय बाल्ये विद्याधनं <u>यच्छसि</u>।
(क) यच्छति (ख) यच्छताम् (ग) यच्छामि (घ) यच्छन्ति

(ii) <u>सः</u> तु वनं गच्छामि। (क) त्वम् (ख) अहं (ग) तौ (घ) वयम्

(iii) अहं श्वः रायपुरम् <u>अगच्छम्</u>। (क) गच्छामः (ख) गमिष्यामि (ग) गमिष्यसि (घ) गच्छावः

(iv) <u>ताः</u> फलानि सुन्दराणि सन्ति। (क) तौ (ख) सः (ग) तानि (घ) आवाम्

Contd...4

schools.aglasem.com
aglasem.com

'घ' भागः पठितावबोधनम्

30 अङ्काः

12. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत – **(5)**

नाहं स्वर्गं न मोक्षं वा कामये किन्तु आर्तानां परित्राणाय एव मे निश्चयः। अस्य याच्ञा वृथा मा अस्तु। इत्युक्त्वा स राजा वैद्योक्तविधिना नीलोत्पलम् इव एकं चक्षुः शनैः अक्षतम् उत्पाट्य प्रीत्या याचकाय समर्पितवान्। सः अपि तत् नेत्रं यथास्थानम् अस्थापयत्। ततो महीपालः द्वितीयं नेत्रमपि शनैः निष्कास्य तस्मै ददौ। अथ विस्मितः शक्रः अचिन्तयत् – अहो धृतिः! अहो सत्वम्! अहो सत्त्वहितैषिता!

(I) एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्) **(½x2=1)**

(i) कः स्वर्गं मोक्षं वा न इच्छति ?

(ii) राजा किं यथास्थानम् अस्थापयत् ?

(iii) स राजा याचकाय किं समर्पितवान् ?

(II) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्) **(1x2=2)**

(i) राजा नेत्रं कथं याचकाय समर्पितवान् ?

(ii) विस्मितः इन्द्रः किम् अचिन्तयत् ?

(iii) 'नाहं स्वर्गं न मोक्षं वा कामये' इति कः वदति ?

(III) निर्देशानुसारम् उत्तरत – (केवलं प्रश्नद्वयम्) **(1x2=2)**

(i) अस्मिन् अनुच्छेदे 'नेत्रम्' इति पदस्य पर्यायः कः लिखितः ?

(ii) 'अचिन्तयत् इति क्रियापदस्य कर्तृपदम् अनुच्छेदे किम् ?

(iii) 'द्वितीयम्' इति पदस्य विशेष्यपदम् अनुच्छेदे किम् ?

13. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत – **(5)**

य इच्छत्यात्मनः श्रेयः प्रभूतानि सुखानि च
न कुर्यादहितं कर्म स परेभ्यः कदापि च।।

(I) एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्) **(½x2=1)**

(i) नरः आत्मनः किम् इच्छति ?

(ii) नरः केभ्यः अहितं कर्म न कुर्यात् ?

(iii) नरः कीदृशं कर्म न कुर्यात् ?

(II) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्) **(1x2=2)**

(i) जीवने मनुष्यः किं किं इच्छति ?

(ii) नरः कियन्ति सुखानि इच्छति ?

(iii) नरः प्रभूतानि कानि इच्छति ?

(III) निर्देशानुसारम् उत्तरत – (केवलं प्रश्नद्वयम्) **(1x2=2)**

(i) 'अहितं कर्म' इति अनयोः पदयोः विशेषणपदं किम् ?

(ii) 'कुर्यात्' इति क्रियापदस्य किं कर्तृपदं श्लोके आगतम् ?

(iii) दुःखानि' इति पदस्य किं विलोमपदं श्लोके आगतम् ?

14. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत – **(5)**

काकः –(प्रविश्य, सक्रोधम्) आः किम् उक्तवती भवती ? यदि अहं कृष्णवर्णः तर्हि श्रीरामस्य वर्णः कीदृशः ? श्रीवासुदेवस्य वर्णः कीदृशः ? मुग्धे! अहं तु अतीव कर्तव्यपरायणः। प्रभाते 'का–का' ध्वनिना सुप्तान् प्रबोधयामि कर्मसु च विनियोजयामि।

राजहंसः – हुँ! किमनेन ? एतत् कार्यं तु कुक्कुटोऽपि करोति।

काकः – (विहस्य) कुक्कुटः! अरे अद्य कुतः कुक्कुटाः नगरेषु। अहमेव सर्वत्र सुलभः।

राजहंसः – भोः भोः वाचाल! स्वीयैः कटुभिः क्वणितैः जनजागरणात् अन्यत् तु किमपि न करोषि।

(I) एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्) **(½x2=1)**

(i) काकस्य वर्णः कीदृशः ?

(ii) अद्य कुक्कुटाः कुत्र न दृश्यन्ते ?

(iii) कः कर्तव्यपरायणः ?

(II) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्) **(1x2=2)**

(i) काकः कथम् सुप्तान् जनान् प्रभाते प्रबोधयति ?

(ii) कः सर्वत्र सुलभः वर्तते ?

(iii) वाचालः कः अस्ति ?

Contd...5

schools.aglasem.com

aglasem.com

(III) निर्देशानुसारम् उत्तरत – (केवलं प्रश्नद्वयम्) **(1x2=2)**

(i) 'करोति' इति क्रियापदस्य कर्तृपदं नाटयांशे किम् प्रयुक्तम् ?

(ii) संवादे 'दुर्लभः' पदस्य कः विपर्ययः ?

(iii) 'कटुभिः क्वणितै': अनयोः विशेषणपदं किम् ?

15. रेखाङ्कित.तपदानि आधृत्य प्रश्ननिर्माणं कुरुत – (केवलं पञ्चप्रश्नाः) **(1x5=5)**

(i) शारदा अस्माकं सन्निधिं कुर्यात्।

(ii) बोधिसत्त्वः शैशवात् विनयशीलः आसीत्।

(iii) राजा याचकेभ्यः दानं ददाति।

(iv) नेपथ्ये काकध्वनिः श्रूयते।

(v) मयूरस्य नृत्यं प्रकृतेः आराधना अस्ति।

(vi) सूर्योदये तमः नश्यति।

16. मञ्जूषातः समुचितपदानि चित्वा अधोलिखित–श्लोकस्य अन्वयं पूरयित्वा पुनः लिखत – **(½x4=2)**

अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते।।

अन्वयः – (i) _____ वाक्यम् अनुद्वेगकरं (ii) _____ प्रियहितं च (तथा) स्वाध्याय–अभ्यसनं (iii) _____ वाङ्मयं (iv) _____ उच्यते।।

मञ्जूषा –

चैव	सत्यं	यत्	तपः

अथवा

मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत – **(½x4=2)**

शक्नोतीहैव यः सोढुं प्राक् शरीरविमोक्षणात्।
कामक्रोधोद्भवं वेगं सः युक्तः स सुखी नरः।।

भावार्थ : – यः मनुष्यः शरीरस्य (i) _____ प्राक् कामात् क्रोधात् च उत्पन्नं (ii) _____ अत्रैव सोढुम् समर्थः (iii) _____ सः जनः योगी अस्ति सः च (iv) _____ नरः अस्ति।

मञ्जूषा –

अस्ति	विमोक्षणात्	वेगं	सुखी

17. अधोलिखितवाक्येषु रेखाङ्कित.तपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत – (केवलं प्रश्नचतुष्टयम्) **(1x4=4)**

(i) अलम् अलं मिथः कलहेन।
(क) मिथ्या (ख) परस्परम् (ग) मिथुनः (घ) मयूरः

(ii) विधात्रा एव अहं पक्षिराजः कृतः।
(क) जिज्ञासा (ख) कर्मणा (ग) प्रेम्णा (घ) **ब्रह्मणा**

(iii) त्वम् आदौ इन्द्रियाणि नियम्य कामं जहि।
(क) अन्ते (ख) समाप्ते (ग) प्रारम्भे (घ) अर्जुनः

(iv) पुंसः विषयेषु सङ्गः जायते।
(क) आसक्तिः (ख) विनम्रता (ग) पवित्रम् (घ) अपवित्रम्

(v) मेध्यम् अमेध्यं सर्वमेव भक्षयति।
(क) शुद्धम् (ख) अशुद्धम् (ग) अद्भुतम् (घ) चकितम्

18. अधोलिखितां कथां मञ्जूषापद–सहायतया पूरयित्वा लिखत – **(½x8=4)**

बोधिसत्वः (i) _____ राजा आसीत्। सः वृद्धोपसेवी (ii) _____ च आसीत्। असौ पुत्रवत् (iii) _____ पालयति स्म। तेन नगरस्य समन्ततः अनेकाः धनधान्यसमृद्धाः (iv) _____ निर्मिताः । तस्य दानशीलताम् (v) _____ देशविदेशेभ्यः जनाः आगच्छन्ति स्म। एकदा देवराजः इन्द्रः तस्य दानशीलताम् (vi) _____ तस्य समीपम् आगत्य अवदत् – हे राजन् ! अहं नेत्रहीनः याचकः (vii) _____ किमपि प्राप्तुम् इच्छामि। यदि भवान् प्रसन्नः तदा एकस्य चक्षुषः मह्यं दानं करोतु। राजा तस्मै (viii) _____ एव अगच्छत्।

मञ्जूषा –

चक्षुर्द्वयम् ,	शिवीनाम् ,	प्रजाः ,	विनयशीलः ,
परीक्षितुम् ,	आकर्ण्य ,	त्वतः ,	दानशालाः

schools.aglasem.com

aglasem.com

QUESTION PAPERS

GET PREVIOUS YEAR QUESTION PAPERS FOR ALL CLASSES FOR CBSE, ISCSE, ISC AND ALL ALL STATE BOARDS HERE AT AGLASEM.COM

BOARD WISE

- Andhra Pradesh Board Question Papers
- Assam Board Question Papers
- Bihar Board Question Papers
- Chhattisgarh Board Question Papers
- Goa Board Question Papers
- Gujarat Board Question Papers
- Haryana Board Question Papers
- Himachal Pradesh Board Question Papers
- J&K State Board Question Papers
- Jharkhand Board Question Papers
- Karnataka Board Question Papers
- Kerala Board Question Papers
- Madhya Pradesh Board Question Papers
- Maharashtra State Board Question Papers
- Manipur Board Question Papers
- Meghalaya Board Question Papers
- Mizoram Board Question Papers
- Nagaland Board Question Papers
- Orissa Board Question Papers
- Punjab Board Question Papers
- Rajasthan Board Question Papers
- Tamil Nadu Board Question Papers
- Telangana State Board Question Papers
- Tripura Board Question Papers
- Uttarakhand Board Question Papers
- Uttar Pradesh (UP) Board Question Papers
- West Bengal (WB) Board Question Papers